# Hiraṇyagarbhas-sūktam

[RV 10-121, AV 4-2, SYMS 13-4, 23-1, 25-10, SYKS 14-4, 25-1. 27-14,
TS 4-1-8, 2-8-2, tāṇḍya brāmhaṇa 9-9, nighaṇṭu 10-23]

ॐ हि॒र॒ण्य॒ग॒र्भः सम॑वर्त॒ताग्रे᳚ भू॒तस्य॑ जा॒तः पति॒रेक॑ , आसीत् ।
स दा᳚धार पृथि॒वीं द्यामु॒तेमां कस्मै᳚ दे॒वाय॑ ह॒विषा᳚ विधेम ॥ १ ॥

ॐ hiraṇ’yagar’bhas’ samavar’tatāg’rēē
bhūtas’ya jāta[fp]’ patirēka , āsī-te ।
sa dāādhāra pṛthivīn’ dyāmutēmāṅ’
kas’maiī dēvāya havișhāā vidhēma ॥ 1 ॥

य , आ᳚त्म॒दा ब॑ल॒दा यस्य॒ विश्व॑ , उ॒पास॑ते प्र॒शिषं॒ यस्य॑ दे॒वाः ।
यस्य॑ छा॒यामृतं॒ यस्य॑ मृ॒त्युः कस्मै᳚ दे॒वाय॑ ह॒विषा᳚ विधेम ॥ २ ॥

ya , āāt’madā baladā yas’ya viśh’va ,
upāsatēp’ praśhiṣhañ’ yas’ya dēvā-ḥa ।
yas’ya chhāyāmṛtañ’ yas’ya mṛt’yu[hk]’
kas’maiī dēvāya havișhāā vidhēma ॥ 2 ॥

यः प्रा᳚ण॒तो नि॑मिष॒तो म॑हि॒त्वैक॒ , इद्राजा॒ जग॑तो ब॒भूव॑ ।
य , ईशे᳚ , अ॒स्य द्वि॒पद॒श्चतु॑ष्पदः॒ कस्मै᳚ दे॒वाय॑ ह॒विषा᳚ विधेम ॥ ३ ॥

ya[fp]’ prāāṇatō nimiṣhatō mahit’vaika ,
id’rājā jagatō babhūva ।
ya , īśhēē , as’yad’ dvipadaśh’chatuṣh’pada[hk]’
kas’maiī dēvāya havișhāā vidhēma ॥ 3 ॥

www.Sanskritveda.net

यस्येमे हिमवन्तो महित्वा यस्य समुद्रं रसया सहाहुः ।
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ॥४॥
yas’yēmē himavan’n’tō mahit’vā yas’ya
samud’ram’ rasayāā sahāhuḥu ।
yas’yēmā[fp]’ pradiśhō yas’ya bāhū
kas’maiī dēvāya haviṣhāā vidhēma ॥ 4 ॥

येन द्यौरुग्रा पृथिवी च दृळ्हा येन स्वः स्तभितं येन नाकः ।
यो , अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ॥५॥
yēnad’ dyaurug’rā pṛthivī cha dṛḷ’hā
yēnas’ svas’ stabhitañ’ yēna nākaḥa ।
yō , an’tarik’ṣhē rajasō vimāna[hk]’
kas’maiī dēvāya haviṣhāā vidhēma ॥ 5 ॥

यं क्रन्दसी , अवसा तस्तभाने , अभ्यैक्षेतां मनसा रेजमाने ।
यत्राधि सूर , उदितो विभाति कस्मै देवाय हविषा विधेम ॥६॥
yaṅ’ kran’dasī , avasā tas’tabhānē ,
abh’yaik’ṣhēētām’ manasā rējamānē ।
yat’rādhi sūra , uditō vibhāti
kas’maiī dēvāya haviṣhāā vidhēma ॥ 6 ॥

आपो ह यद् बृहतीर्विश्वमायन् गर्भं दधाना जनयन्तीरग्निम् ।
ततो देवानां समवर्ततासुरेकः कस्मै देवाय हविषा विधेम ॥७॥
āpōō ha yad’ bṛhatīr’viśh’vamāyan’
gar’bhan’ dadhāānā janayan’n’tīrag’nim ।
tatōō dēvānām’ samavar’tatāsurēka[hk]’
kas’maiī dēvāya haviṣhāā vidhēma ॥ 7 ॥



www.sanatan.net

यश्चिदापो॑ महि॒ना प॒र्यप॑श्य॒द् दक्षं॒ दधा॑ना ज॒नय॑न्ती॒र्य॒ज्ञम् ।
यो दे॒वेष्वधि॑ दे॒व , एक॒ , आसी॒त् कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम ॥८॥

yaś’chidāpōō mahinā par’yapaś’yad’
dak’ṣhan’ dadhāāna janayan’n’tīr’yaj’ñam ।
yō dēvēṣh’vadhi dēva , ēka , āsīt’
kas’maii dēvāya haviṣhāā vidhēma ॥ 8 ॥

मा नो॑ हिंसीज्जनि॒ता यः पृ॑थि॒व्या यो वा॑ दिवं॑ स॒त्यध॑र्मा ज॒जान॑ ।
यश्चा॒पश्च॒न्द्रा बृ॑ह॒तीर्ज॒जान॒ कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम ॥९॥

mā nōō him’sīj’janitā ya[fp]’ pṛthiv’yā
yō vā divam’m’ sat’yadharm’m’mā jajāna ।
yaś’chāpaś’chan’drā bṛhatīr’jajāna
kas’maii dēvāya haviṣhāā vidhēma ॥ 9 ॥

प्रजा॑पते॒ न त्वदे॒तान्य॒न्यो विश्वा॑ जा॒तानि॒ परि॒ ता ब॑भूव ।
यत्का॑मास्ते जुहु॒मस्तन्नो॑ , अस्तु व॒यं स्या॑म॒ पत॑यो र॒यी॒णाम् ॥१०॥

prajāāpatē nat’ tvadētān’yan’yō
viś’vāā jātāni pari tā babhūva ।
yat’kāāmās’tē juhumas’tan’nōō ,
as’tu vayam’ syāāma patayō rayīṇām ॥ 10 ॥

ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ॥

www.SaiVeda.net